# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (१०)

२०.११.२०१२

# ४७१. यञश्च (४.१.१६)

- पदद्वयम् । यञः, च ।
- ‘ङ्याप्प्रातिपदिकात्’ (४.१.१) इति, ‘स्त्रियाम्’ (४.१.३) इति, ‘अनुपसर्जनात्’ (४.१.१४) इति च अधिक्रियन्ते । ‘अजाद्यतष्टाप्’ (४.१.४) इत्यतः ‘अतः’ इति, ‘ऋन्नेभ्यो ङीप्’ (४.१.५) इत्यतः ‘ङीप्’ इति च अनुवर्तते ।
- यञन्तात् स्त्रियां ङीप् स्यात् ।
- यञन्तादिति ।
- अकारलोपे कृते ।
- अकारलोपे कृत इति ।

# ४७२. हलस्तद्धितस्य (६.४.१५०)

- पदद्वयम् । हलः, तद्धितस्य ।
- 'ढे लोपोऽकद्र्वाः' (६.४.१४७) इत्यतः 'लोपः' इति, 'यस्येति च' (६.४.१४८) इत्यतः 'ईति' इति, 'सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः' (६.४.१४९) इत्यतः 'य, उपधायाः' इति च अनुवर्तते ।
- हलः परस्य तद्धितयकारस्य उपधाभूतस्य लोपः स्याद् ईति परे ।
- गार्गी ।

# अनपत्याधिकारस्थान्न ङीप् (वा)

- ‘तस्यापत्यम्’ (४.१.९२ - ४.१.१७८)
- द्वीपे भवा द्वैप्या ।
- ‘द्वीपादनुसमुद्रं यञ्’ (४.३.१०)

- अधिकारग्रहणाद् नेह - देवस्यापत्यं दैव्या ।
- ‘देवाद्यञञौ’ (वा) इति हि यञ् प्राग्दीव्यतीयः, न त्वपत्याधिकारपठितः ।
- प्राग्दीव्यतोऽण् (४.१.८३) इत्यधिकारे ‘दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः’ (४.१.८५) इति सूत्रे पठितम् इदं वार्त्तिकम् ।

# ४७३. प्राचां ष्फ तद्धितः (४.१.१७)

- पदत्रयम् ।
- ‘यञः’ (४.१.१६) इति अनुवर्तते ।
- यञन्तात् ष्फः वा स्यात् स्त्रियाम्, स च तद्धितः ।
- गार्ग्य ष्फ

# ४७४. षः प्रत्ययस्य (१.३.६)

- पदद्वयम् । षः, प्रत्ययस्य ।
- ‘उपदेशोऽजनुनासिक इत्’ (१.३.२) इत्यतः ‘इत्’ इति, ‘आदिर्ञिटुडवः’ (१.३.५) इत्यतः ‘आदिः’ इति च अनुवर्तते ।
- प्रत्ययस्यादिः षः इत् स्यात् ।

- गार्ग्य ष्फ
- गार्ग्य फ (‘षः प्रत्ययस्य’ - १.३.६, ‘तस्य लोपः’ - १.३.९)

# ४७५. आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (७.१.२)

- पदत्रयम् । आयन्-एय्-ईन्-ईय्-इयः, फ-ढ-ख-छ-घाम्, प्रत्ययादीनाम् ।
- प्रत्ययादिभूतानां फादीनां क्रमाद् आयन्नादयः आदेशाः स्युः ।
- यथासंख्यपरिभाषया क्रमेणान्वयः ।

- गार्ग्य फ
- गार्ग्य आयन   ('आयनीयीनीयियः..' - ७.१.२)
- गार्ग्य् आयन   ('यस्येति च' - ६.४.१४८)
- गार्ग्यायन
- तद्धितान्तत्वात् प्रातिपदिकत्वम् ।

- षित्त्वसामर्थ्यात् ष्फेण उक्तेऽपि स्त्रीत्वे 'षिद्गौरादिभ्यश्च' (४.१.४१) इति वक्ष्यमाणो ङीष् ।

- गार्ग्यायन (ङीष्) ई ('षिद्गौरादिभ्यश्च' - ४.१.४१)
- गार्ग्यायन् ई ('यस्येति च' - ६.४.१४८)
- गार्ग्यायणी ('अट्कुप्..' - ८.४.२)

# ४७६. सर्वत्र लोहितादिकतन्तेभ्यः (४.१.१८)

- पदद्वयम् । सर्वत्र, लोहितादि-कतन्तेभ्यः ।
- 'यञश्च' (४.१.१६) इत्यतः 'यञः' इति, 'प्राचां ष्फ तद्धितः' (४.१.१७) इत्यतः 'ष्फ तद्धितः' इति च अनुवर्तते ।
- सर्वत्र इति ।
- लोहितादिभ्यः कतशब्दान्तेभ्यः यञन्तेभ्यः नित्यं ष्फः स्यात् ।
- लौहित्यायनी ।
- लौहित्यायनीति ।
- कात्यायनी ।

# ४७७. कौरव्यमाण्डूकाभ्यां च (४.१.१९)

- पदद्वयम् ।
- 'प्राचां ष्फ तद्धितः' (४.१.१७) इत्यतः 'ष्फ तद्धितः' इति अनुवर्तते ।
- आभ्यां ष्फः स्यात् ।
- क्रमेण टाब्ङीषोरपवादः ।
- 'कुर्वादिभ्यो ण्यः' ।
- कौरव्यायणी ।
- 'ढक्क मण्डूकात्' इत्यण् ।
- 'गोत्रं च चरणैः सह' इति जातित्वाद् 'जातेरस्त्रीविषयाद्..' इति ङीष् प्राप्तः ।
- माण्डूकायनी ।

# आसुरेरुपसंख्यानम् (वा)

- आसुरायणी ।
- आसुरायणीति ।

# ४७८. वयसि प्रथमे (४.१.२०)

- पदद्वयम् ।
- 'अजाद्यतष्टाप्' (४.१.४) इत्यतः 'अतः' इति, 'ऋन्नेभ्यो ङीप्' (४.१.५) इत्यतः 'ङीप्' इति अनुवर्तते ।
- वयसि प्रथमे ।
- प्रथमवयोवाचिनोऽदन्तात् स्त्रियां ङीप् स्यात् ।
- कुमारी ।
- अप्रादुर्भूतयौवना इत्यर्थः ।

# वयस्यचरम इति वाच्यम् (वा)

- वयस्यचरम इति ।
- वधूटी ।
- चिरण्टी ।
- वधूटचिरण्टशब्दौ यौवनवाचिनौ ।

- अतः किम्?
- शिशुः ।
- प्रथमवयोवाचित्वेऽपि अदन्तत्वाभावात् न ङीप् ।

- कन्याया न, ‘कन्यायाः कनीन च’ इति निर्देशात् ।